श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगुरुवायुपुरेश्वर अष्टोत्तरशतनामावळिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Smt. Krishnapriya of Bahrain for providing us the printed text of this stotram.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीगुरुवायुपुरेश्वर अष्टोत्तरशतनामावळिः ॥

| | | | |
|---|---|---|---|
| 1 | ओं श्रीं ह्रीं क्लीं महावैकुण्ठ-नाथाख्याय नमः | 2 | ओं महानारायणाभिधाय नमः |
| 3 | ओं तारश्रीशक्तिकन्दर्प-चतुर्बीजकशोभिताय नमः | 4 | ओं गोपालसुन्दरीरूपाय नमः |
| 5 | ओं श्रीविद्यामन्त्रविग्रहाय नमः | 6 | ओं रमाबीजसमारम्भाय नमः |
| 7 | ओं ह्रल्लेखासमलङ्कृताय नमः | 8 | ओं मारबीजसमायुक्ताय नमः |
| 9 | ओं वाणीबीजसमन्विताय नमः | 10 | ओं पराबीजसमाराध्याय नमः |
| 11 | ओं मीनकेतनबीजकाय नमः | 12 | ओं तारशक्तिरमायुक्ताय नमः |
| 13 | ओं कृष्णायपदपूजिताय नमः | 14 | ओं कादिविद्याद्यकूटाढ्याय नमः |
| 15 | ओं गोविन्दायपदप्रियाय नमः | 16 | ओं कामराजाख्यकूटेशाय नमः |
| 17 | ओं गोपीजनसुभाषिताय नमः | 18 | ओं वल्लभायपदप्रीताय नमः |
| 19 | ओं शक्तिकूटविजृम्भिताय नमः | 20 | ओं वह्निजायासमायुक्ताय नमः |
| 21 | ओं परावाङ्मदनप्रियाय नमः | 22 | ओं मायारमासुसम्पूर्णाय नमः |
| 23 | ओं मन्त्रराजकलेबराय नमः | 24 | ओं द्वादशावृतिचक्रेशाय नमः |
| 25 | ओं यन्त्रराजशरीरकाय नमः | 26 | ओं पिण्डगोपालबीजाढ्याय नमः |
| 27 | ओं सर्वमोहनचक्रगाय नमः | 28 | ओं षडक्षरीमन्त्ररूपाय नमः |
| 29 | ओं मन्त्रात्मरसकोणगाय नमः | 30 | ओं पञ्चाङ्गकमनुप्रीताय नमः |

www.prapatti.com

| | | | |
|---|---|---|---|
| 31 | ओं सन्धिचक्रसमर्चिताय नमः | 32 | ओं अष्टाक्षरीमन्त्ररूपाय नमः |
| 33 | ओं महिष्यष्टकसेविताय नमः | 34 | ओं षोडशाक्षरीमन्त्रात्मने नमः |
| 35 | ओं कलानिधिकलार्चिताय नमः | 36 | ओं अष्टादशाक्षरीरूपाय नमः |
| 37 | ओं अष्टादशदलपूजिताय नमः | 38 | ओं चतुर्विंशतिवर्णात्मगायत्री-मनुसेविताय नमः |
| 39 | ओं चतुर्विंशतिनामात्मशक्ति-बृन्दनिषेविताय नमः | 40 | ओं क्लीङ्कारबीजमध्यस्थाय नमः |
| 41 | ओं कामवीथीप्रपूजिताय नमः | 42 | ओं द्वात्रिंशदक्षरारूढाय नमः |
| 43 | ओं द्वात्रिंशद्भक्तसेविताय नमः | 44 | ओं पिण्डगोपालमध्यस्थाय नमः |
| 45 | ओं पिण्डगोपालवीथिगाय नमः | 46 | ओं वर्णमालास्वरूपाढ्याय नमः |
| 47 | ओं मातृकावीथिमध्यगाय नमः | 48 | ओं पाशाङ्कुशद्विबीजस्थाय नमः |
| 49 | ओं शक्तिपाशस्वरूपकाय नमः | 50 | ओं पाशाङ्कुशीयचक्रेशाय नमः |
| 51 | ओं देवेन्द्रादिप्रपूजिताय नमः | 52 | ओं भूर्जपत्रादौ लिखिताय क्रमाराधितवैभवाय नमः |
| 53 | ओं ऊर्ध्वरेखासमायुक्ताय नमः | 54 | ओं निम्नरेखाप्रतिष्ठिताय नमः |
| 55 | ओं सम्पूर्णमेरुरूपेण पूजिताया-खिलप्रदाय नमः | 56 | ओं मन्त्रात्मवर्णमालाभिः सम्यक्शोभितचक्रराजे नमः |
| 57 | ओं श्रीचक्रबिन्दुमध्यस्थयन्त्र-संराट्स्वरूपकाय नमः | 58 | ओं कामधर्मार्थफलदाय नमः |
| 59 | ओं शत्रुदस्युनिवारकाय नमः | 60 | ओं कीर्तिकान्तिधनारोग्यरक्षा-श्रीविजयप्रदाय नमः |
| 61 | ओं पुत्रपौत्रप्रदाय नमः | 62 | ओं सर्वभूतवेतालनाशनाय नमः |

www.prapatti.com

| | | | |
|---|---|---|---|
| 63 | ओं कासापस्मारकुष्ठादि-सर्वरोगविनाशकाय नमः | 64 | ओं त्वगादिधातुसम्बद्धसर्वामय-चिकित्सकाय नमः |
| 65 | ओं डाकिन्यादिस्वरूपेण सप्त-धातुषु निष्ठिताय नमः | 66 | ओं स्मृतिमात्रेणाष्टलक्ष्मी-विश्राणनविशारदाय नमः |
| 67 | ओं श्रुतिमौलिसमाराध्यमहा-पादुकलेबराय नमः | 68 | ओं महापदावनीमध्यरमादि-षोडशीद्विकाय नमः |
| 69 | ओं रमादिषोडशीयुक्तराजगोप-द्वयान्विताय नमः | 70 | ओं श्रीराजगोपमध्यस्थमहा-नारायणद्विकाय नमः |
| 71 | ओं नारायणद्वयालिढमहा-नृसिंहरूपकाय नमः | 72 | ओं लघुरूपमहापादवे नमः |
| 73 | ओं महामहासुपादुकाय नमः | 74 | ओं महापदावनीध्यानसर्वसिद्धि-विलासकाय नमः |
| 75 | ओं महापदावनीन्यासशताधिक-कलाष्टकाय नमः | 76 | ओं परमानन्दलहरीसमारब्ध-कलान्विताय नमः |
| 77 | ओं शताधिककलान्तोद्यच्छ्रीम-च्चरणवैभवाय नमः | 78 | ओं शिर आदिब्रह्मरन्ध्रस्थानन्य-स्तकलावलये नमः |
| 79 | ओं इन्द्रनीलसमच्छायाय नमः | 80 | ओं सूर्यस्पर्धिकिरीटकाय नमः |
| 81 | ओं अष्टमीचन्द्रबिम्भ्राजदलिक-स्थलशोभिताय नमः | 82 | ओं कस्तूरीतिलकोद्भासिने नमः |
| 83 | ओं कारुण्याकुलनेत्रकाय नमः | 84 | ओं मन्दहासमनोहारिणे नमः |
| 85 | ओं नवचम्पकनासिकाय नमः | 86 | ओं मकरकुण्डलद्वन्द्वसंशोभित-कपोलकाय नमः |
| 87 | ओं श्रीवत्साङ्कितवक्षःश्रिये नमः | 88 | ओं वनमालाविराजिताय नमः |
| 89 | ओं दक्षिणोरःप्रदेशस्थपरा-हङ्कृतिराजिताय नमः | 90 | ओं आकाशवत्कृशिष्ठश्रीमध्य-वल्लीविराजिताय नमः |


www.prapatti.com

| | | | |
|---|---|---|---|
| 91 | ओं शङ्खचक्रगदापद्मसंराजित-चतुर्भुजाय नमः | 92 | ओं केयूराङ्गदभूषाढ्याय नमः |
| 93 | ओं कङ्कणालिमनोहराय नमः | 94 | ओं नवरत्नप्रभापुञ्जच्छुरि-ताङ्गुलिभूषणाय नमः |
| 95 | ओं गुल्फावधिकसंशोभिपीतचेल-प्रभान्विताय नमः | 96 | ओं किङ्किणीनादसंराजत्काञ्ची-भूषणशोभिताय नमः |
| 97 | ओं विश्वक्षोभकरश्रीकमसृणो-रुद्वयान्विताय नमः | 98 | ओं इन्द्रनीलाश्मनिष्पन्नसम्पुटा-कृतिजानुकाय नमः |
| 99 | ओं स्मरतूणाभलक्ष्मीकजङ्घा-द्वयविराजिताय नमः | 100 | ओं मांसलगुल्फलक्ष्मीकाय नमः |
| 101 | ओं महासौभाग्यसंयुताय नमः | 102 | ओं ह्रीङ्कारतत्त्वसम्बोधिनूपुर-द्वयराजिताय नमः |
| 103 | ओं आदिकूर्मावतारश्रीजयिष्णु-प्रपदान्विताय नमः | 104 | ओं नमज्जनतमोबृन्दविध्वंसक-पदद्वयाय नमः |
| 105 | ओं नखज्योत्स्नालिशैशिर्यपर-विद्याप्रकाशकाय नमः | 106 | ओं रक्तशुक्लप्रभामिश्रपादुका-द्वयवैभवाय नमः |
| 107 | ओं दयागुणमहावार्धये नमः | 108 | ओं गुरुवायुपुरेश्वराय नमः |

॥ इति श्रीगुरुवायुपुरेश्वर अष्टोत्तरशतनामावळिः संपूर्णा ॥

www.prapatti.com